# वायोः प्रामाण्यनिरूपणे गौतमीयकाणादीयसिद्धान्तसमीक्षणम्

## Vāyoḥ prāmāṇyanirūpaṇe gautamīyakāṇādīya-siddhāntasamīkṣaṇam

**Aniruddha Ghosh**
Ph.D. Scholar
Ramakrishna Mission Vidyamandira
Belur Math, Howrah, West Bengal, India
Email: ghoshaniruddha69@gmail.com

**Abstract:** शोधपत्रेऽस्मिन् गौतमीयं काणादीयं च मतमुपलक्ष्य वायोः प्रामाण्यविषये विचारः क्रियते। तत्रादौ वायोः प्रामाण्यनिरूपणावसरे प्राचीननैयायिकाः किं मतं पोषयन्ति इति विचार्य्यते। रूपाभावात् वायुः न प्रत्यक्षीक्रियते इति प्राचां मतिः। स च वायुः स्पार्शनप्रत्यक्षेण अनुमीयते। एवं वायोः प्रामाण्यम् अनुमानेन स्थापयन्ति ते। किन्तु नव्याः वायोः प्रत्यक्षत्वमुररीकुर्वन्ति। वायुप्रत्यक्षीकरणाय ते अनुमानं स्थापयन्ति। एवमन्यत्र कणादसम्प्रदायाः वायोः द्रव्यत्वं कथमङ्गीकुर्वन्ति, वायोः द्रव्यत्वे किं मानं, सामान्यतोदृष्टानुमानेन वायुसिद्धिः कथं भवति इति विषयाः परिष्क्रियन्ते। अन्ते च आलोचितप्रकरणस्य केषाञ्चन प्रश्नानां समाधानं प्रदीयते इति शोधसंक्षेपः।

**Keywords:** भाषापरिच्छेदः, तर्कसंग्रहः, तर्कभाषा, न्यायदर्शन, वैशेषिकदर्शनम्, प्रशस्तपादभाष्यम्।

**भूमिका—**

"अन्तकः पर्यवस्थाता जन्मिनः सन्ततापदः।
इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः"॥[1] इति।

अस्मिन् असारसंसारे भ्राम्यमाणाः ऐहिकविषयविमुग्धाः विषयरसप्रेप्सवः प्राणिनः इष्टार्थाप्तये विषविषयमेव भुञ्जते। यथा गुञ्जायमानाः द्विरेफाः मधुपूरितपुष्पदलेभ्यः मधु आस्वाद्य पुनः भ्रमन्ति पुष्पान्तरं तथा वयमपि भोगिनः विषयानुरक्ताः विषयाद्विषयान्तरं भ्रमामहे, विषयरसं चास्वादयामहे। विषयरसभुञ्जानो वयं यं विषयं कामयामहे किं तत् आजीवनसुखदायकम्? तदा उच्यते न, दुःखदाः अपि भवन्ति विषयाः। किन्तु सुखसाधकेषु विषयेष्वेव अस्माकमासक्तिः। आमृत्यु सुखं प्रेप्सवः प्राणिनः कर्मणि बद्धाः भवन्ति। न केवलं सुखप्राप्तयेऽपि तु दुःखापायाय एव मनुष्याणां प्रवृत्तिः अवलोक्यते। वस्तुतः निरतिशयं मृग्यमाणाः मानवाः अविमिश्रं सुखं नानुभवन्ति। यतो हि समेषां दुःखानामत्यन्ततया ध्वंसेनैव निरतिशयं सुखं लभ्यते। लौकिकानामेतेषां दुःखानां ध्वंसस्तु शास्त्रज्ञानेन, गुरूपदिष्टवेदान्तवाक्यानां विश्वासपूर्वकं पालनेन

च सम्भवति। पारमार्थिकसुखसाधनस्य आत्यन्तिकदुःखनाशस्य च समाधानसाधकं शास्त्रमिदं दर्शनशास्त्रम्। तत्र दिव्यचक्षुषां महर्षीणां तपोपूतया आबिर्भूतं सत्यासत्यनिकषलक्षणं सकलपदार्थजातस्यालोचनपरं ज्ञानमेव दर्शनम्। दृश्यतेऽनेनेति व्युत्पत्तेः प्रेक्षणार्थकदृशिर्धातोः ल्युटा दर्शनशब्दो निष्पद्यते। अस्य मोक्षसाधकस्य दर्शनशास्त्रस्य आस्तिकनास्तिकभेदेन नव भेदाः परिलक्ष्यन्ते। तेषु पदार्थतत्त्वप्रतिपादितत्वेन न्यायवैशेषिकयोः प्राधान्यं परिलक्ष्यते। तत्र न्यायदर्शनं प्रमाणप्रमेयादीनां षोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसम् अधिगमयति। वैशेषिकं च तद्दर्शनं द्रव्यादीनां षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानमेव निःश्रेयसहेतुत्वेन अभिमन्यते। तत्र तैः पदार्थतत्त्वनिरूपणकाले द्रव्यरूपेण वायुः अङ्गीकृतः। वा-गतिगन्धनयोः इति विग्रहे वा इति धातोः उणि युकि च कृते वायुशब्दो निष्पद्यते। वायोरस्तित्वे प्रमां तावत् श्रुतिः— 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नम् अन्नात्पुरुषः'[2] इति। श्रुतिप्रतिपादितोऽयं वायुः केन प्रमाणेन ज्ञायते प्रत्यक्षेण उत अनुमानेन इति विचारविश्लेषणं न्यायवैशेषिकदिशा स्फुटीक्रियते।

**वायुप्रामाण्ये प्राचीननैयायिकाभिमतप्रमाणम्—**

रूपाभावात् वायुः न प्रत्यक्षीक्रियते इति प्राञ्चः आहुः। स च वायुः स्पार्शनप्रत्यक्षेण अनुमीयते। त्वाच्प्रत्यक्षस्य कारणं भवति रूपवत्त्वम्। वायोः नीरूपत्वात् तस्य त्वाच्प्रत्यक्षोऽपि न सम्भवति। यतो हि यस्य द्रव्यस्य स्पार्शनप्रत्यक्षो भवति तस्य संख्यापरिमाणयोरपि स्पार्शनप्रत्यक्षो भवति इत्येव नियमः। यथा अन्धकारप्रकोष्ठे घटो न दृश्यते। तदा स्पार्शनप्रत्यक्षेण तस्य संख्यापरिमाणयोः स्पार्शनप्रत्यक्षं जायते। किन्तु वायोः स्पार्शनप्रत्यक्षे तन्निष्ठसंख्यापरिमाणौ प्रत्यक्षस्य विषयौ न भवतः। तस्माद्वायोः प्रत्यक्षं न भवति, तद्गतगुण एव प्रत्यक्षीक्रियते अस्माभिः। तेषां मते वायुरयं न केवलं स्पर्शेन अपि तु विशेषशब्देन धृत्या कम्पनेन च प्रमीयते। विजातीयोऽयं स्पर्शः द्रव्याश्रितः गुणत्वात्, रूपवदित्यनुमानेन विजातीयानुष्णाशीतस्पर्शस्य द्रव्याश्रितत्वं सिद्ध्यति। प्रश्नोऽयं यत् विजातीयानुष्णाशीतस्पर्शगुणः कस्मिन् द्रव्ये आश्रियते इति? तदा उच्यते यत् पृथिव्यां तन्नाश्रियते। यतो हि उद्भूतस्पर्शविशिष्टपार्थिवद्रव्यं सर्वदैव रूपविशिष्टं भवति। किञ्च अनुष्णाशीतस्पर्शाश्रयस्तु जलं न भवति, तस्य शीतस्पर्शाश्रयत्वात्। एवं तेजसोऽपि उष्णस्पर्शाधिकरणत्वात् अनुष्णाशीतस्पर्शवत्त्वं न सम्भवति। आकाशादिषु विभुद्रव्येष्वपि तन्नाश्रियते। मनसः अणुपरिमाणात् तत् प्रत्यक्षगम्यं न भवति। तस्मात् तन्निष्ठगुणोऽपि अप्रत्यक्ष एव। अपरत्र अनुष्णाशीतस्पर्शस्तु प्रत्यक्षगम्यो भवति। अतः मनः विजातीयस्पर्शाश्रयं भवितुं नार्हति, तदाश्रितगुणस्य अप्रत्यक्षत्वात्। एवं परिशेषानुमानेन अस्माभिरनुभूयमानस्य अपाकजानुष्णाशीतस्पर्शस्य आश्रयः वायुः कश्चिद् द्रव्यविशेषः इति प्रमाणितम्।

**वायुप्रामाण्ये नव्यनैयायिकानामभिमतिः—**

नव्यास्तु वायोः प्रत्यक्षत्वमुररीकुर्वन्ति। ते कथयन्ति बहिरिन्द्रियजन्यद्रव्याणां प्रत्यक्षत्वे रूपं

न कारणम्। कस्यचित् द्रव्यस्य रूपमस्ति चेत् तस्य चाक्षुषप्रत्यक्षः सम्भवति। किन्तु रूपरहितत्वात् वायोः चाक्षुषप्रत्यक्षो न भवति। वायुं स्पृशामि इत्येवमनुभवः जायते अस्माकम्। अर्थात् वायोः त्वाच्प्रत्यक्षः अङ्गीक्रियते, न तु चाक्षुषप्रत्यक्षः।

अनुमानेन वायोः प्रत्यक्षत्वं स्थापयन्ति नव्याः। वायोः प्रत्यक्षत्वसाधने अनुमानं तावत्- वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटवदिति। घटे विद्यमानस्य स्पर्शस्य यदा प्रत्यक्षो भवति तदा प्रत्यक्षीकृतस्पर्शस्य आश्रयत्वेन घटोऽपि प्रत्यक्षो भवति। वायुरपि तद्वत् ज्ञेयम्।

प्राचीनसांख्याचार्याणां मन्तव्यं हि त्वगिन्द्रियमेव सर्वशारीरवर्ति बाह्येन्द्रियं भवति। त्वचः सर्वशरीरव्याप्यत्वात् तदितरेन्द्रियस्थानव्यापकत्वात् ज्ञानजनकत्वात् त्वगेव बाह्येन्द्रियमिति। कर्णस्थानगतत्वगेव कर्णेन्द्रियं, नासिकास्थानगतत्वगेव घ्राणेन्द्रियमिति। अन्धस्य त्वगिन्द्रियस्य वर्तमानत्वादपि चक्षुरिन्द्रिये त्वचांशस्य अविद्यमानत्वात् तथा च बधिरस्य श्रवणेन्द्रियस्थले तथात्वात्, अन्धस्य रूपप्रत्यक्षो न सम्भवति, बधिरस्य च शब्दप्रत्यक्षो न भवति।

**वायोः द्रव्यत्वसाधने काणादीयप्रमाणानि —**

कणादसम्मतषड्सु पदार्थेषु द्रव्यमादिमः पदार्थः। तत्र नव द्रव्येषु वायुः चतुर्थः इति सूत्रादेव ज्ञायते। वायोः स्वरूपं वैशेषिकाचार्यैः सूत्रमुखेन कथितं— 'स्पर्शवान् वायुः'[3] इति। अर्थात् स्पर्शाश्रयो हि वायुः। अनुभवगम्योऽयं स्पर्शाश्रयो वायुः अनुमीयते, न तु प्रत्यक्षीक्रियते इति काणादीयसिद्धान्तः। नित्योऽनित्यरूपः सः वायुः द्विविधः। नित्यः परमाणुरूपः अनित्यश्च द्व्यणुकादिरूपः जन्यवायुः। स च वायुः स्पर्शादिभिः चतुर्भिर्लिङ्गैः अनुमीयते। वायोः स्पर्शलिङ्गमिदम् अनुष्णाशीतप्रकारकं भवति। योऽयं स्पर्शः अनुभूयते स क्वचिदाश्रित एव। यतो हि गुणाः द्रव्ये आश्रियन्ते। तस्मात् सः स्पर्शोऽपि कस्मिंश्चित् द्रव्ये आश्रियते एव। एवं स्पर्शाश्रयसिद्धौ स्पर्शाश्रयस्य अष्टद्रव्यातिरिक्तद्रव्यत्वं साधयति। तस्मादेव उक्तमुपस्कारे— 'स्पर्शाश्रयो न पृथिव्यादित्रयात्मकः, नीरूपत्वात्' इति। अत्रानुमाने पृथिव्यादित्रयात्मकत्वाभावः साध्यः, नीरूपत्वञ्च हेतुः। अर्थात् यत्र यत्र नीरूपत्वं तत्र तत्र पृथिव्यादित्रयात्मकत्वाभावः इत्यन्वयव्याप्तिः। अत्र आकाशः सपक्षः वर्तते। अन्वयव्याप्तौ व्याप्यः तिष्ठति चेत् व्यापकोऽपि स्यादेव, अर्थात् नीरूपत्वं तिष्ठति चेत् पृथिव्यादित्रयात्मकत्वाभावोऽपि स्यात्। यतो हि व्याप्यसत्त्वे व्यापकसत्ता इत्यस्ति प्रसिद्धः नियमः। एवं व्याप्तिज्ञानानन्तरं 'पृथिव्यादित्रयात्मकत्वाभावव्याप्यनीरूपत्ववान् स्पर्शाश्रयः' इति परामर्शः जायते। तदनन्तरं 'स्पर्शाश्रयः पृथिव्यादित्रयात्मकत्वाभाववान्' इति अनुमितिज्ञानं जायते। एवं प्रतीयमानस्पर्शाश्रयः न आकाशादिपञ्चात्मकः स्पर्शवत्त्वात् इत्यनुमानेन प्रतीयमानस्पर्शाश्रयस्य आकाशादिपञ्चद्रव्यभिन्नत्वं साध्यते। एवमितरबाधसहकृतेनाष्टद्रव्यातिरिक्तद्रव्यत्वेन अभिमतस्य वायोः सिद्धिः क्रियते।

**परमाणुवायोः द्रव्यत्वसिद्धिः—**

वायुं स्पृशामि इत्येवमनुभवो यदा जायते तदा महद्वायोरेव स्पर्शः अनुभूयते।

महद्वायोरवयवेषु क्षुद्रतमांशः भवति परमाणुवायुः। स च नित्यः। परमाणुवायोरवयवो न भवति। अतः परमाणुवायुः द्रव्यसमवेतो न भवति, तस्य निरवयवत्वात्। निरवयवपरमाणुवायोः अवयवविशिष्टद्व्यणुकादिवायुः जायते। परमाणुवायोरद्रव्यत्वात् वायोः द्रव्यत्वापत्तिप्रसङ्गः आयाति। तत्र समाधानं सूत्रमुखेन दीयते— 'अद्रव्यवत्त्वेन द्रव्यम्'[4] इति। अर्थात् अद्रव्याश्रितत्वात् द्रव्यं भवति परमाणुवायुः। तदा जन्यवायोरपि द्रव्यत्वसिद्धिः नितरां जायते।

**वायोरनुमेयत्वस्थापनम्—**

'सामान्यतोदृष्टाच्चाविशेषः'[5] इति सूत्राज्ज्ञायते यत् सामान्यतोदृष्टानुमानेन वायुः अनुमीयते। सूत्रे अविशेषपदेन वायोः ग्रहणं भवति। यत्र हेतुसाध्ययोः व्याप्तिः प्रत्यक्षो न भवति तत्र सामान्यतोदृष्टानुमानेन साध्यसिद्धिरनुमेया। अनुमानं त्रिविधं— पूर्ववत्, शेषवत्, सामान्यतोदृष्टं चेति। पूर्ववदित्यत्र पूर्वशब्दः कार्यार्थस्य द्योतकः। शेषवदित्यत्र शेषशब्दः कारणार्थस्य ज्ञापकः। तस्मात्तयोः पूर्ववच्छेषवतोः व्युत्पत्तिः क्रियते 'पूर्वं विद्यते यत्र'ति पूर्ववत्, 'शेषो विद्यते यत्र' इति शेषवत्। अर्थात् यत्र अनुमाने कारणं हेतुरूपेण विद्यमानं वर्तते, तेन च कारणेन कार्यमनुमीयते तद्भवति पूर्ववदनुमानम्। यथा मेघोन्नत्या वृष्टिर्भविष्यति इत्यत्र भविष्यत्कालीनवर्षणं प्रति मेघोन्नतिः कारणम्। वृष्टिहेतुः या मेघोन्नतिः तया 'वृष्टिः भविष्यति' इत्यनुमानं क्रियते। यत्र च कार्यं हेतुरूपेण विद्यते तद्धि शेषवदिति कथ्यते। शेषवदनुमाने तु कार्येण कारणस्यानुमानं क्रियते। यथा पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा अनुमीयते भूता वृष्टिरिति। अत्रानुमाने नद्याः पूर्णत्वशीघ्रत्वयोः विशिष्टधर्मयोः दर्शनं हि कार्यम्। तच्च कार्यं दृष्ट्वा भूतकाले वृष्टिरभवत् इत्यनुमानं क्रियते। अर्थात् एकत्र कारणं दृष्ट्वा कार्यस्य अनुमानं भवति, अपरत्र च कार्यं दृष्ट्वा कारणस्यानुमानं भवति। किन्तु सामान्यतोदृष्टानुमानं हि अनयोः किञ्चिद्भिन्नं वर्तते। यस्मिन्ननुमाने हेतुसाध्ययोः व्याप्तिरूपसम्बन्धः प्रत्यक्षयोग्यो न भवति, किन्तु तत्सजातीये अन्यपदार्थे व्याप्तिनिश्चयोऽपि भवति किञ्च व्याप्तिरूपसम्बन्धोऽपि प्रत्यक्षयोग्यो भवति तत्र सजातीययोः भिन्नपदार्थद्वयोः तत्सामान्यमाधारीकृत्य प्रकृतसाध्यस्य अनुमानं क्रियते चेत्तदनुमानं सामान्यतोदृष्टमिति आचक्षते। यथा अयमनुभूयमानः अनुष्णाशीतस्पर्शः क्वचिद्द्रव्याश्रितः गुणत्वाद् इत्यनुमानं क्रियते सामान्यतोदृष्टस्य। अत्रानुमाने हेतुसाध्ययोः गुणत्वद्रव्याश्रितत्वयोः व्याप्तिरूपसम्बन्धस्य प्रत्यक्षयोग्यता न सम्भवति। अर्थात् यत्र यत्र गुणत्वं तत्र तत्र द्रव्याश्रितत्वम् इत्याकारिकां व्याप्तिं प्रत्यक्षीकर्तुं न शक्यते, साध्यरूपक्वचिद्द्रव्याश्रितत्वेन अभिमतस्य वायोः उद्भूतरूपाभावेन प्रत्यक्षासम्भवात्। किन्तु स्पर्शस्य गुणत्वात् तस्य क्वचिद्द्रव्याश्रितत्वमनुमीयते। अर्थात् प्रकृते अनुमाने हेतुसाध्ययोः यः व्याप्तिरूपसम्बन्धः तस्य प्रत्यक्षयोग्यता नास्ति। किन्तु रूपं द्रव्याश्रितं गुणत्वात्, संख्यावत् इत्यनुमाने अनयोः गुणत्वद्रव्याश्रितत्वयोः हेतुसाध्ययोः व्याप्तिरूपसम्बन्धः प्रत्यक्षयोग्यो भवति। किञ्च रूपे स्पर्शस्य सादृश्यं परिलक्ष्यते, उभयोः गुणत्वात्। अत एव तौ सजातीयौ। अतः तत्र सजातीययोः रूपस्पर्शयोः गुणत्वरूपसामान्यमाधारीकृत्य प्रकृतसाध्यस्य क्वचिद्द्रव्याश्रितत्वस्य वायोः अनुमानं क्रियते। अत

अनुमानमिदं सामान्यतोदृष्टम् इति। तथा चायमनुभूयमानस्पर्शः क्वचिदाश्रितः स्पर्शवत्त्वात् गुणत्वाद्वा इति सामान्यतोदृष्टानुमानेनैव इतरबाधसहकृतेनाष्टद्रव्यातिरिक्तद्रव्यस्य वायोः सिद्धिर्भवति।

**सिद्धान्तः—**

वायुर्हि सदा प्रवाहमानः गतिशीलः स्पर्शादिभिः अनुभूयमानः रूपरहितः द्रव्यविशेषः। वायोः प्रत्यक्षत्वमुररीकुर्वन्ति नव्यनैयायिकाः, प्राञ्चास्तु तस्य अप्रत्यक्षत्वमनुमेयत्वं वा आमनन्ति। प्राचीनानां वायोरप्रत्यक्षत्वे स्पर्शादि लिङ्गं भवति। किञ्च नव्याः वायोः प्रत्यक्षत्वे अनुमानं स्थापयन्ति- वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटवदिति। वायुर्हि द्रव्यं, तद्गतगुणश्च वायुः इति। द्रव्ये गुणास्तिष्ठन्ति, तस्माद् गुणाः द्रव्याश्रिताः। द्रव्यस्य प्रकटने तस्मिन् विद्यमानाः गुणा अपि प्रकटीभवन्ति। द्रव्यज्ञानमन्तरा तद्गतगुणाः न ज्ञायन्ते। किन्तु गुणास्तु न द्रव्यज्ञापकाः, ते केवलं द्रव्येषु आश्रयं लभन्ते। अनुमितौ ज्ञायते यत् हेतुना साध्यसिद्धिर्भवति। परन्त्वत्र स्पर्शादिभिः लिङ्गैः वायोः सिद्धिर्जायते इति तु न युक्तम्। यतो हि द्रव्यज्ञानानन्तरमेव तद्गतगुणानां ज्ञानं भवति। न हि चन्दनस्य अवर्तमानेऽपि चन्दनगतसौरभस्य प्रतीतिरस्माभिः लभ्यते। तस्मात् वायुज्ञानादनन्तरमेव तद्गतगुणानां स्पर्शादीनां तदाश्रितत्वेन ज्ञानं भवति। तदा लोके व्यवह्रियते एतद्गुणवदेतद्द्रव्यमिति। तस्मादेव रूपरहितः स्पर्शवान् वायुः इति प्रयोगः परिलक्ष्यते। किञ्च नैयायिकेषु नवीनैः सम्प्रदायैः वायोः प्रत्यक्षत्वसाधने यदनुमानम् उपस्थाप्यते प्रत्यक्षस्पर्शाश्रयत्वं हेतुः, प्रत्यक्षश्च साध्यः। धर्मप्रत्यक्षात् धर्मिप्रत्यक्षं भवति इति तु लोकसिद्धमेव। अत्रापि स्पर्शप्रत्यक्षात् धर्मात् धर्मिणो वायोः ज्ञानं भवति इति दृश्यत एव। वस्तुतस्त्वेवं न भवति। वायोः प्रत्यक्षज्ञानादनन्तरं तद्गतधर्मस्य अपि प्रत्यक्षज्ञानं भवति। धर्मप्रत्यक्षं प्रति धर्मिप्रत्यक्षं कारणं भवतीत्येव नियमः। द्रव्याश्रिताः गुणाः एव तस्य द्रव्यस्य धर्माः भवन्ति। तेषां द्रव्याश्रितधर्माणां प्रत्यक्षं प्रति कारणं भवति द्रव्यप्रत्यक्षम्। तेन वाय्वाश्रितस्पर्शादिधर्माणां प्रत्यक्षं प्रति वायुरेव कारणमिति दृश्यते।

किञ्च वैशेषिकदर्शने नित्यवायोः द्रव्यत्वसिद्धौ प्रमाणं यथा प्रदर्शितं तथा अनित्यवायोरस्तित्वमपि सामान्यतोदृष्टानुमानेन प्रतिस्थापितम्। तत्र वायु इति नाम प्रति आगमः प्रमाणमिति तेषां चिन्ता। 'वायुर्वै क्षेपिष्ठा देवता','वायुश्च सर्ववर्णोऽयं सर्वगन्धवहः शुचिः'[6] इत्यादिभिः आगमप्रमाणैः वायु इति नाम सप्रमाणं सिद्ध्यति। तत्र श्रुतौ प्रतिपादितस्य वायोः यः परिचयः प्राप्यते स तु द्रव्यरूपेण सिद्ध एव। वायोः क्षिप्रत्वं सर्ववर्णमयत्वं सर्वगन्धवहत्वम् इति यानि विशेषणानि तत्र प्राप्यन्ते तान्येव वायोः द्रव्यत्वस्वीकारे यथार्थप्रमाणं किल। तथापि वैशेषिकाः कथं वायोरस्तित्वं सामान्यतोदृष्टानुमानेन प्रतिस्थापयन्ति इति मदीया सामान्यजिज्ञासा। आगमप्रमाणेन वायोः नाम यथा सिद्ध्यति तथैव वायोः द्रव्यत्वमपि इति।

न त्वेवं विरोधो यथार्थः वर्तते। वस्तुतस्तु 'नाममात्रमागमिकं द्रव्यसिद्धिस्तु सामान्यतोदृष्टादेव'[7] इति कथनस्य अयमेव आशयः यत् ग्रन्थदिशा वायोरस्तित्वं

सामान्यतोदृष्टानुमानेन पूर्वमेव सिद्धम्। अनन्तरं वायुसंज्ञायां प्रमाणं हि आगमः इति द्रढयति। अयमेव संक्षेपसिद्धान्तः।

## Endnotes

1. किरातार्जुनीयम्, सम्पा.- पण्डितदुर्गाप्रसादः। मुम्बाईः तुकारम जावजी, १८१७। पृ.- १६८
2. मन्त्रपुष्पम्, सम्पा.- स्वामी देवरूपानन्दः। मुम्बईः रामकृष्ण मठ, २००७ तृतीय संस्करणम्। पृ.- २३
3. वैशेषिकदर्शनम्. सम्पा.- श्री पञ्चानन तर्करत्न भट्टाचार्य। कलिकाताः, १३१३। पृ.- ११२
4. वैशेषिकदर्शनम्. सम्पा.- श्री पञ्चानन तर्करत्न भट्टाचार्य। कलिकाताः, १३१३। पृ.- १२५
5. तदेव पृ.- १२९
6. वैशेषिकदर्शनम्. सम्पा.- श्री पञ्चानन तर्करत्न भट्टाचार्य। कलिकाताः, १३१३। पृ.- १३२
7. वैशेषिकदर्शनम्. सम्पा.- श्री पञ्चानन तर्करत्न भट्टाचार्य। कलिकाताः, १३१३। पृ.- १३२

## Bibliography


- अन्नम्भट्टः। तर्कसंग्रहः। झा रामचन्द्रः (सम्पा.) । वाराणसीः चोखम्बा संस्कृत सीरीजः, २०२२।
- भट्टाचार्य-शास्त्री पञ्चाननः। भाषापरिच्छेदः। कलिकाताः संस्कृत पुस्तक भाण्डारः,।
- शास्त्री उदयवीरः। वैशेषिकदर्शनम्। दिल्लीः विजयकुमार गोविन्दराज हासानन्दः, २०१०।
- शर्मा श्रीरामः। न्यायदर्शन। उत्तरप्रदेशः संस्कृति संस्थानः, १९७१।


——